Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 30

No. of Printed Pages – 7

# VU–94–Sans. Vangmay (Supp.)

# वरिष्ठ उपाध्याय पूरक परीक्षा, 2018

## संस्कृत वाङ्मय (अनिवार्यः)

**समय** : 3¼ **घण्टे**

**पूर्णांक** : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्याः ।

2) सर्वे प्रश्नाः अनिवार्याः ।

3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः।

5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

1) ‘गार्ग्य:’ इत्यत्र क: प्रत्यय:? [1]

2) ‘जनानां समूह:’ इत्यर्थे किं पदं सिध्यति? [1]

3) पतिसेवातत्परायाः स्त्रिय: नामद्वयं लेख्यम्। [1]

4) पितु: भ्राता क: भवति? लेखनीयम्। [1]

5) पुत्र्या: त्रीणि नामानि कानि? [1]

6) अहोरात्रे कति प्रहरा: भवन्ति? [1]

7) वारक्रमं संक्षेपेण लेखनीयम्। [1]

8) तिथीनां संज्ञा कति भवन्ति? [1]

9) एकस्मिन् मासे कति पक्षा:? नामानि लेख्यानि। [1]

10) या स्वयं मन्त्रव्याख्यानं करोति, तस्या: स्त्रिय: नाम किम्? [1]

11) श्रीमदम्बिकादत्त व्यासस्य कृतित्वं स्पष्टयत। [2]

12) निम्नलिखित गद्यांशस्य भावार्थो लेख्य: – [2]

ततो 'वीर! कुशलोऽसि, सर्वं करिष्यसि, जाने तव चातुरीं, तद् यथेच्छं गच्छ, नाहं व्याहन्मि तवोत्साहम्, नीतिमार्गान् वेत्सि, किन्तु, परिपन्थिन एते अत्यन्तनिर्दया:, अतिकदर्य्या:, अतिकूटनीतयश्च सन्ति।

13) भर्तृहरे: परिचयो देय:। [2]

14) निम्नलिखित पद्यांशस्य भावार्थो लेख्य :– [2]

विपदि धैर्यमथाभ्युदये क्षमा,

सदसि वाक्पटुता, युधि विक्रम:।

यशसि चाऽभिरुचिर्व्यसनं श्रुतौ,

प्रकृतिसिद्धमिदं हि महात्मनाम्।।

15) मातु : चत्वारि नामानि लेखनीयानि। [2]

16) ज्योतिष–अवकहडाचक्रस्य मङ्गलाचरणं लेखनीयम् [2]

17) अशुद्धि संशोधनं कुरुत – (रेखाङ्कितपदयो:) [2]

i) नगरस्य उभयत: वृक्षा: सन्ति।

ii) दश पुस्तकम् सन्ति।

18) कस्यचिदेकस्य गद्यांशस्य सप्रसङ्ग व्याख्या विधेया– [3]

i) तेषु च अपजलखान–दमन–विषयकवार्तामारिप्सुष्वेव कश्चिद् वेत्रहस्त: प्रतीहार: प्रविश्य, वेत्रं कक्षे संस्थाप्य, शिरो नमयित्वा, अञ्जलिं बद्ध्वा न्यवीविदत्– ''प्रभो! श्रीमान् गौरसिंहो दिदृक्षतेऽत्र भवन्तम्''–तदाकर्ण्य ''आम् प्रवेशय प्रवेशय'' इति सानन्दं सोत्साहं च कथितवति महाराष्ट्र मण्डलाऽऽखण्ऽले, प्रतिहारो निवृत्य, सपद्येव तं प्रावीविशत्।

ii) इतस्तु प्रतापदुर्गे विहिताहार व्यापारे रजतपर्यङ्किकामेकाधिष्ठिते किञ्चित् तन्द्रा परवशे इव गोपीनाथे, शिववीर: शनैरुपसृत्य प्रणम्य, उपाविशदवोचच्च–अहो! भाग्यमस्माकं यदालयं युष्मादृशा भूदेवा: स्वचरणरजोभि: पावयन्ति इति।

19) शिवराजविजयस्य प्रथमविरामस्य द्वितीयनि:श्वासस्य संक्षिप्तकथासारं लिखत। [3]

20) कस्यचिदेकस्य पद्यांशस्य सप्रसङ्ग–व्याख्या कार्या– [3]

i) आरम्भगुर्वी क्षयिणी क्रमेण,

लघ्वी पुरा वृद्धिमती च पश्चात्।

दिनस्य पूर्वार्द्ध–परार्द्ध भिन्ना,

छायेव मैत्री खल–सज्जनानाम्।।

ii) भवन्ति नम्रास्तरव: फलोद्गमै–

नर्वाम्बुभिर्दूरविलम्बिनो घना:।

अनुद्धता: सत्पुरूषा: समृद्धिभि:,

स्वभाव एवैष परोपकारिणाम्।।

21) सन्मित्रलक्षणानि कानि–कानि भवन्ति? लेखनीयानि [3]

22) केषाञ्चित् त्रयाणां वाक्यानां संस्कृतभाषायाम् अनुवादो विधेय:– [3]

i) कन्या फल चाहती है।

ii) जटा से संन्यासी ज्ञात होता है।

iii) शत्रु आँख से काना है।

iv) नगर के चारों ओर वृक्ष हैं।

v) गुरू को नमस्कार है।

23) कयोश्चिद् द्वयो: सुत्रयो: व्याख्या कार्या– [2 × 2 = 4]

i) इसुसुक्तान्तात्क:

ii) शिखाया वलच्

iii) कपिज्ञात्योर्ढक्

24) कयोश्चिद् द्वयोः सूत्रयोः व्याख्या कार्या– [2 × 2 = 4]

i) सार्वधातुकार्धधातुकयोः

ii) तस्थस्थमिपां तान्तन्तामः

iii) स्यतासी लृलुटोः

25) कयोश्चिद् द्वयोः चत्वारः–चत्वारः पर्यायाः लेखनीयाः [2 × 2 = 4]

i) मानवः

ii) स्त्री

iii) देहः

26) कयोश्चिद् द्वयोः नामानि लेखनीयानि – [2 × 2 = 4]

i) नक्षत्रम्

ii) करणम्

iii) राशि

27) कञ्चन एकं विषयमवलम्ब्य निबन्धं (150 शब्दैः) लिखत – [5]

i) विद्याविहीनः पशुः

ii) गीतामहिमा

iii) सत्संगतिः

iv) पर्यावरण–संरक्षणम्

28) अधोलिखितेषु केऽपि त्रयः प्रयोगाः साधनीयाः [3 × 2 = 6 ]

गव्यम्, शैवः, सौम्यम्, कालिकम्, मायूरः

29) अधोलिखितेषु केऽपि त्रयः प्रयोगाः साधनीयाः [3 × 2 = 6]

भवामि, बभूव, भवितारः अभविष्यम् अभवन्।

30) अधोलिखितेषु केऽपि चत्वारः प्रयोगाः साधनीयाः – [4 × 2 = 8]

दैव्यः, वासुदेवः, प्राचार्यः, वैयाकरणः, शालेयम्, प्राज्ञः

● ● ●

DO NOT WRITE ANYTHING HERE